# संस्कृत वार्ता:

दिनाङ्क : 22/08/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- केन्द्रीय-गृह-मन्त्री अमितशाहः सिलिगुडी-नगरे वरिष्ठैः गोरखा-नेतृभिः सह मेलनम् अकरोत्; वार्ताकारस्य पङ्कजसिङ्घस्य अध्यक्षतायां समाह्वानानां समाधानाय उच्च-स्तरीय-समित्याः घोषणापि जाता।
- सर्वकारेण चतुर्वर्षेभ्यः न्यून-बालकानां कृते क्लोरफेनिरामाईन् मैलिएट् तथा फिनाईले फ्राईन् हैड्रोक्लोराईड् इत्येतैः युक्तानां सर्वाणि निश्चित-मात्रा-संयोजनानि निर्माणे, विक्रयणे, वितरणे च प्रतिबन्धं स्थापितम्।
- अद्य सायङ्काले आन्ध्रप्रदेशस्य विशाखापत्तनम-नगरे ब्रिक्स्-युवा-मन्त्रिणां सभा आरभ्यते।
- भारतः सोमालिया-देशेन सह द्वाविंशतिः भारतीय-नाविकैः सह विदेशीय-ध्वजयुक्तयोः वाणिज्यिक-नौकायानयोः अपहरणस्य विषये चर्चां करोति।
- बी. डब्ल्यू. एफ्. बैड्मिण्टन्-विश्व-स्पर्धायां, भारतीय-महिला-डबल्स्-युग्मस्य त्रिसा-जाली-गायत्री-गोपीचन्दयोः तथा चीनदेशस्य लियु-शेङ्ग्-शू, टैन्-निङ्ग्-इत्येतयोः मध्ये उपांत्यचक्रीय-स्पर्धा सम्प्रति नवदिल्ल्यां प्रचलति।

-------------------------------------------------------------

<u>पश्चिम बंगाल-अमितशाह:</u>

पश्चिमबंङगस्य पर्वतीयक्षेत्राणां सर्वे:पक्षधारकै: सह केन्द्रीय मन्त्रिणा अमितशाहेन सिलिगुडी-नगरे उपवेशनमेकं कतृम्। अद्य विषये अस्मिन् निर्णायोऽयं जात: यत् तत्रत्य पर्वतीय-क्षेत्राणां समाह्वानानां स्थायि-समाधानार्थं पूर्व आईपीएस अधिकारिण: पंकजसिंहस्य नेतृत्वे एकस्या: मध्यस्थ-समित्या: संरचना जाता। समितिरियं केन्द्रीय-कार्यालयं प्रति प्रतिवेदनं प्रेषयिष्यति । सिलिगुडी नगरस्य सुकार क्षेत्रे अनुष्ठिते अस्मिन् उपवेशने पश्चिमबंगस्य विपक्षिनेतार: सुवेन्दु अधिकारी अन्ये च गणमान्य जना: उपस्थिता: आसन्।

---

**प्रधानमन्त्री**

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् भारतदेशेन 'लाइसेंस राज' इत्यस्य कालावधौ उत्पादन दण्डित करणस्य स्वीय-दृष्टिकोणे आधारभूत-परिवर्तनं विहितमस्ति। साम्प्रतं तत्स्थाने प्राशासनिक-प्रोडक्शन-लिंक्ड-इंसेंटिव-पीएलआई इत्यनया योजनया माध्यमेन पुरस्कृत: क्रियते। प्रवर्तमान्-वर्षीय –'इकोनोमिक-टाइम्स-वर्ल्ड-लीडर्स फोरम' इत्स्मात् मञ्चात् स्वीय संबोधने प्रधानमन्त्री प्रोक्तवान् यत् पुरातनी पद्धति: साम्प्रतिकी पद्धतित: भिन्न वर्तते।

प्रधानमन्त्रिणा पीएलआई योजनाया: सफलता अपि चर्चिता। यत्र सार्द्ध द्विलक्ष-कोटि-रूप्याकाणां निवेश: जात: द्विविंशति-लक्ष-कोटि-रूप्यकाणाम् उत्पादनं-क्रयणं, पञ्चदशलक्ष-कोटि-रुप्यकाणां निर्यात: अपि जात:, चतुर्दश-लक्षाधिकानि वृत्त्यवसराणि अपि सृजितानि ।

श्री मोदी भारतदेश: अन्ताराष्ट्रिय-समुदायस्य आशा-विकासस्य च उज्ज्वल-स्थानं विद्यते इति प्रतिपादितवान् ।

---

**औषधय:**

सर्वकारेण अद्य क्लोरफेनिरामाईन् मैलिएट् तथा फिनाईले फ्राईन् हैड्रोक्लोराईड् इत्येतयो: घटनानां युक्तानां सर्वासां नियतमात्रा-संयोजन-औषधीनां निर्माणे, विक्रये, वितरणे च प्रतिबन्धिता: । स्वास्थ्यमन्त्रालयेन एका अधिसूचना प्रदर्शिता, यस्यां चतुवर्षेभ्य: येषु बालकेषु एतासाम् औषधीनां प्रयोग: न करणीय: इति स्पष्टं कृतम्। बालकानां स्वास्थ्य- सुरक्षाया: विषये: एष: महत्वपूर्ण: निर्णय: विद्यते। प्रशासनेन इदम् अपि कथितं यत् एतादृशानां संयोजनानां प्रयोग: बालकेषु हानिकारक: भवितुम् अर्हति।

---

**ब्रिक्स-उपवेशनम्**

युवा-कार्य-क्रीडा-मन्त्रालयस्य केन्द्रीय-मन्त्री डॉ. मनसुख मांडविया ब्रिक्स-देशानां मन्त्रिभिः, वरिष्ठ-प्रतिनिधिभिः च साकं अद्य आन्ध्रप्रदेश-स्यस्य विशाखापट्टनम-नगरस्य समीपे स्थितस्य ऐतिहासिकस्य थोटलाकोंडा-क्षेत्रे-प्राचीन-बौद्ध-अवशेषानां, स्तूपानां ध्यानकेन्द्राणां, पाकशालानां च दर्शनं कृतवान्। डॉ. मांडविया 'एक पेड़ मां के नाम' इति अभियानस्य अन्तर्गतं थोटलाकोंडा-क्षेत्रे एकं वृक्षारोपणं कृतवान्। इयं यात्रा प्रवर्तमान वर्षस्य ब्रिक्स-अध्यक्षता-इत्यस्य कार्यक्रमाणां भागो विद्यते। अद्य सांयकाले विशाखाट्टनम-नगरे ब्रिक्स-युवा-मन्त्रिणां सम्मेलनं आयोज्यते। डॉ. मनसुख मांडविया इत्यनेन साकं शिक्षा-कौशल-विकासः, उद्यमिता-कल्याण-संपोषण-विकासः इत्येतेषु विषयेषु सहयोग-सुदृढीकरणस्य उपायानां विषये चर्चा करिष्यति। सम्मेलनस्य एते एव प्रमुखाः विषयाः विद्यन्ते।

------------------------------------------------------------

<u>सोमालिया</u>

द्वाविंशतिः भारतीय-नाविकैः सह वैदेशीय-ध्वजयुक्तयोः वाणिज्यिक-नौकायानयोः अपहरणस्य विषये भारतं सोमालिया-देशस्य अधिकारिणां समक्षम् अवोचत्। एम्. टी. सिबू-नौकायां षोडश भारतीय-नाविकैः, एम्. वी. लुतुफ्-नौकायां षट् भारतीय-नाविकैः च सह एतयोः नौकायानयोः येमेन-सोमालिया-देशयोः पृथक् पृथक् घटनायां सशस्त्र-समुद्रीय-जलदस्युभिः अपहृताः। केन्या-देशे भारतीय-उच्च-आयोगः सामाजिकान्तर्जालीये पटले अवदत् यत्, सर्वे भारतीयाः नाविकाः सुरक्षिताः सन्ति इति कथ्यते। सः अवदत् यत्, भारतं स्वस्य सामुद्रिक-समुदायस्य सुरक्षायै कल्याणाय च सर्वाधिकं महत्त्वं प्रददाति। मिशन इत्यनेन उक्तं यत् ते सोमालिया-देशस्य सम्बद्धैः अधिकारिभिः सह प्रकरणं विनिमयी कृतवन्तः।

------------------------------------------------------------

<u>सर्वकारीय-विज्ञापनविधिः</u>

दूरदर्शन वाहिन्यां कृते केन्द्रीय-सर्वकारेण विज्ञापन-प्रसारणस्य अधिकतम-अवधिः समापिता। निर्णयस्य अस्य प्रभावः केबल-टेलीविजन-नेटवर्क-नियम्-चतुर्णवत्युत्तर-नवदश-तम-राजपत्रस्य अधिसूचनायाः प्रकाशनेन साकं परिलक्ष्यते। पूर्व सूचना-प्रसारण-मन्त्रालयेन उक्तं यत् दूरदर्शन-

प्रसारण-क्षेत्रे आगतानां परिवर्तनानां दृष्ट्या विज्ञापनावधि-सम्बद्धानां नियमानां पुन: समीक्षा आवश्यकी वर्तते।

---------------------------------------------------------------

**भाजपा-वंदे मातरम्**

अद्य भारतीय-जनता-पार्टीति दलेन वन्दे-मातरम् इत्यस्य ऐतिहासिक-रिक्य-संरक्षणस्य विषये एक: प्रस्ताव: पारित:। एकस्मिन् सामाजिक-अनतरर्जालीय सन्देशे भाजपा दलीय अध्यक्ष: नितिन-नबीन: प्रोक्तवान् यत् दलं केवलं प्रथम-श्लोकद्वयं गायन इत्यस्य कांग्रेस कार्य समित्या: निर्णयस्य विरोध: करोति। तेन प्रोक्तं यत् भारतीय-जनता-पार्टीति दलं सामुदायिक-संकीर्णतां निराकृत्य राष्ट्रगानं प्रवर्तयितुं सर्वविधा: प्रयासा: विधास्यति।

भारतीय-जनता-पार्टीति दलं 'वन्दे मातरम्' इत्यस्य गीतस्य प्रचार-प्रसारस्य कृते राष्ट्रव्यापि-अभियान आचरयिष्यति। नवदिल्ल्यां वार्ताहरै: सह सम्मेलने दलीय प्रवक्ता संबित-पात्रा भणितवान् यत् निर्णयोऽयं नव-नियुक्तानां राष्ट्रिय-पदाधिकारिणां प्रथम-अधिवेशने गृहीत: वर्तते।

---------------------------------------------------------------

**जयशंकर:-रूस-यात्रा**

विदेशमन्त्री डॉ. एस. जयशंकर: श्व: प्रभृति रूस-देशस्य द्विदिवसीय-अधिकारिक-यात्रा करिष्यति। तत्र श्री जयशंकर: भारत-रूस-अन्तर्प्राशासनिक-आयोगस्य व्यापारिक-आर्थिक-प्रविधि-सांस्कृतिक-सहयोग-विषयाणां सप्तविंशतितमस्य अधिवेशनस्य सह-अध्यक्षतां विधास्यति। भ्रमणकाले डॉ. जयशंकर: रूस-देशस्य विदेशमन्त्रिणा सर्गेई-लावरोव इत्यनेन सह मेलन विधास्यति। क्षेत्रीय-वैश्विक विषयेषु चर्चा अपि करिष्यति।

---------------------------------------------------------------

**ऋतुविभाग:**

भारतीय-ऋतुविज्ञान-विभागेन अद्य पश्चिमीय-मध्य प्रदेशे-भीषणतिभीषणा वृष्टे: नारङ्ग-वर्णीया संचेताना प्रसारिता। ऋतुविज्ञान विभागेन सूचितं यत् वृष्टे: संभावना दिल्ली-हरियाणा-

चण्डीगढ-पञ्जाब-पश्चिम-उत्तर प्रदेश-हिमाचलप्रदेश-जम्मू-कश्मीर-लद्दाख-राज्येषु विद्यते। एतदतिरिच्य भारतस्य बहुषु प्रदेशेषु अपि आगामिषु त्रिषु दिवसेषु वृष्टेः सम्भावना प्रकटितास्ति।

---

**बैडमिंटन**

बी. डब्ल्यू. एफ्. बैड्मिण्टन्-विश्व-स्पर्धायां, भारतीय-महिला-डबल्स्-युग्मस्य त्रिसा-जाली-गायत्री-गोपीचन्दयोः तथा चीनदेशस्य लियु-शेङ्ग्-शू, टैन्-निङ्ग्-इत्येतयोः मध्ये उपांत्यचक्रीय-स्पर्धा सम्प्रति नवदिल्ल्यां प्रचलति।

।। इति वार्ता: ।।